# Shri Shodashi Hridaya

# શ્રીષોડશીહૃદયમ્ અથવા શ્રીલલિતાત્રિપુરસુન્દરીહ્રિદયસ્તોત્રમ્

## Document Information

Text title : ShoDashI Hridayam

File name : ShoDashIhRidaya.itx

Category : hRidaya, devii, dashamahAvidyA, devI, lalitA

Location : doc_devii

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay

Latest update : June 13, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીષોડશીહૃદયમ્ અથવા શ્રીલલિતાત્રિપુરસુન્દરીહ્રિદયસ્તોત્રમ્

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીઉમામહેશ્વરાભ્યાં નમઃ ॥

॥ અથ શ્રીષોડશીહૃદયપ્રારમ્ભઃ ॥
કૈલાસે કરુણાક્રાન્તા પરોપકૃતિમાનસા ।
પપ્રચ્છ કરુણાસિન્ધું સુપ્રસન્નં મહેશ્વરમ્ ॥ ૧॥
શ્રીપાર્વત્યુવાચ ॥
આગામિનિ કલૌ બ્રહ્મન્ ધર્મકર્મવિવર્જિતાઃ ।
ભવિષ્યન્તિ જનાસ્તેષાં કથં શ્રેયો ભવિષ્યતિ ॥ ૨॥
શ્રીશિવ ઉવાચ ॥
શ઼ૃણુ દેવિ પ્રવક્ષ્યામિ તવ સ્નેહાન્મહેશ્વરિ ।
દુર્લભં ત્રિષુ લોકેષુ સુન્દરીહૃદયસ્તવમ્ ॥ ૩॥
યે નરા દુઃખસન્તપ્તા દારિદ્ર્યહતમાનસાઃ ।
અસ્યૈવ પાઠમાત્રેણ તેષાં શ્રેયો ભવિષ્યતિ ॥ ૪॥
વિનિયોગઃ
ૐ અસ્ય શ્રીમહાષોડશીહૃદયસ્તોત્રમન્ત્રસ્ય આનન્દભૈરવ ઋષિઃ ।
દેવી ગાયત્રી છન્દઃ । શ્રીમહાત્રિપુરસુન્દરી દેવતા ।
ઐં બીજમ્ । સૌઃ શક્તિઃ । ક્લીં કીલકમ્ ।
ધર્માર્થકામમોક્ષાર્થે જપે (પાઠે) વિનિયોગઃ ।
॥ અથ ઋષ્યાદિન્યાસઃ ॥

ૐ આનન્દભૈરવઋષયે નમઃ શિરસિ ।
દેવી ગાયત્રી છન્દસે નમઃ મુખે ।
શ્રીમહાત્રિપુરસુન્દરીદેવતાયૈ નમઃ હૃદયે ।
ઐં બીજાય નમઃ નાભૌ ।
સૌઃ શક્તયે નમઃ સ્વાધિષ્ઠાને ।

ક્લીં કીલકાય નમઃ મૂલાધારે ।
વિનિયોગાય નમઃ પાદયોઃ ॥
॥ ઇતિ ઋષ્યાદિન્યાસઃ ॥

॥ અથ કરન્યાસઃ ॥

ઐં હ્રીં ક્લીં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ક્લીં શ્રીં સૌઃ ઐં તર્જનીભ્યાં નમઃ ।
સૌઃ ૐ હ્રીં શ્રીં મધ્યમાભ્યાં નમઃ ।
ઐં કએલહ્રીં હસકલહ્રીં અનામિકાભ્યાં નમઃ ।
ક્લીં સકલ કનિષ્ઠિકાભ્યાં નમઃ ।
સૌઃ સૌઃ ઐં ક્લીં હ્રીં શ્રીં કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
॥ ઇતિકરન્યાસ ॥

॥ અથ હૃદયાદિષડઙ્ગન્યાસઃ ॥

ઐં હ્રીં ક્લીં હદયાય નમઃ ।
ક્લીં શ્રીં સૌઃ ઐં શિરસે સ્વાહા ।
સૌઃ ૐ હ્રીં શ્રીં શિખાયૈ વષટ્ ।
ઐં કએલહ્રીં હસકલહ્રીં કવચાય હુમ્ ।
ક્લીં સકલ નેત્રત્રયાય વૌષટ્ ।
સૌઃ સૌઃ ઐં ક્લીં હ્રીં શ્રીં અસ્ત્રાય ફટ્ ॥
॥ ઇતિ હૃદયાદિષડઙ્ગન્યાસઃ ॥

॥ અથ ધ્યાનમ્ ॥
બાલવ્યક્તવિભાકરામિતનિભાં ભવ્યપ્રદાં ભારતી-
મીષત્ફુલ્લમુખામ્બુજસ્મિતકરૈરાશાભવાન્ધાપહામ્ ।
પાશં સાભયમઙ્કુશં ચ વરદં સમ્બિભ્રતીં ભૂતિદાં
ભ્રાજન્તીં ચતુરમ્બુજાકૃતકરૈર્ભક્ત્યા ભજે ષોડશીમ્ ॥ ૫॥
॥ ઇતિ ધ્યાનમ્ ॥

સુન્દરી સકલકલ્મષાપહા કોટિકઞ્જકમનીયકાન્તિભૃત્ ।
Var (કોટિકઞ્જપ્રિયકામ્યકાન્તિકા)
કોટિકલ્પકૃતપુણ્યકર્મણા પૂજનીયપદપુણ્યપુષ્કરા ॥ ૬॥
શર્વરીશસમસુન્દરાનના શ્રીશશક્તિસુકૃતાશ્રયાશ્રિતા ।
સજ્જનાનુશરણીયસત્પદા સઙ્કટે સુરગણૈઃ સુવન્દિતા ॥ ૭॥

યા સુરાસુરરણે જવાન્વિતા આજઘાન જગદમ્બિકાઽજિતા । સઞ્જઘાન
તાં ભજામિ જનનીં જગજ્જનિં યુદ્ધયુક્તદિતિજાન્સુદુર્જયાન્ ॥ ૮॥
Var તાં ભજામિ જગતાં જનિં જયાં યુદ્ધયુક્તદિતિજાન્સુદુર્જયાન્
યોગિનાં હૃદયસઙ્ગતાં શિવાં યોગયુક્તમનસાં યતાત્મનામ્ ।
જાગ્રતીં જગતિ યત્નતો દ્વિજા યાં જપન્તિ હૃદિ તાં ભજામ્યહમ્ ॥ ૯॥
કલ્પકાસ્તુ કલયન્તિ કાલિકાં યત્કલા કલિજનોપકારિકા ।
કૌલિકાલિકલિતાન્ઘ્રિપઙ્કજાં તાં ભજામિ કલિકલ્મષાપહામ્ ॥ ૧૦॥
Var કૌલિકાલિકલિતાન્ઘ્રિકઞ્જકાં
બાલાર્કાનન્તશોચિર્નિજતનુકિરણૈર્દીપયન્તીં દિગન્તાન્
દીપ્તૈર્દેદીપ્યમાનાં દનુજદલવનાનલ્પદાવાનલાભામ્ ।
દાન્તોદન્તોગ્રચિતાં દલિતદિતિસુતાં દર્શનીયાં દુરન્તાં
દેવીં દીનાર્દ્રચિત્તાં હૃદિ મુદિતમનાઃ ષોડશીં સંસ્મરામિ ॥ ૧૧॥
ધીરાન્ધન્યાન્ધરિત્રીધવવિધૃતશિરો ધૂતધૂલ્યબ્જપાદાં
ધૃષ્ટાન્ધારાધરાધો વિનિધૃતચપલાચારુચન્દ્રપ્રભાભામ્ ।
ધર્મ્યાન્ધૂતોપહારાન્ધરણિસુરધવોદ્ધારિણીં ધ્યેયરૂપાં
ધીમદ્ધન્યાતિધન્યાન્ધનદધનવૃતાં સુન્દરીં ચિન્તયામિ ॥ ૧૨॥
જયતુ જયતુ જલ્પા યોગિની યોગયુક્તા
જયતુ જયતુ સૌમ્યા સુન્દરી સુન્દરાસ્યા ।
જયતુ જયતુ પદ્મા પદ્મિની કેશવસ્ય
જયતુ જયતુ કાલી કાલિની કાલકાન્તા ॥ ૧૩॥
જયતુ જયતુ ખર્વા ષોડશી વેદહસ્તા
જયતુ જયતુ ધાત્રી ધર્મિણી ધાતૃશાન્તિઃ ।
જયતુ જયતુ વાણી બ્રહ્મણો બ્રહ્મવન્દ્યા
જયતુ જયતુ દુર્ગા દારિણી દેવશત્રોઃ ॥ ૧૪॥
દેવિ ત્વં સૃષ્ટિકાલે કમલભવભૃતા રાજસી રક્તરૂપા
રક્ષાકાલે ત્વમમ્બા હરિહૃદયધૃતા સાત્વિકી શ્વેતરૂપા ।
ભૂરિક્રોધા ભવાન્તે ભવભવનગતા તામસી કૃષ્ણરૂપા
એતાશ્ચાન્યાસ્ત્વમેવ ક્ષિતમનુજમલા સુન્દરી કેવલાદ્યા ॥ ૧૫॥
સુમલશમનમેતદ્દેવિ ગોપ્યં ગુણજ્ઞે
ગ્રહણમનનયોગ્યં ષોડશીયં ખલઘ્નમ્ ।
સુરતરુસમશીલં સમ્પ્રદં પાઠકાનાં
પ્રભવતિ હૃદયાખ્યં સ્તોત્રમત્યન્તમાન્યમ્ ॥ ૧૬॥

ઇદં ત્રિપુરસુન્દર્યાઃ ષોડશ્યાઃ પરમાદ્ભુતમ્ ।
યઃ શ‍ૃણોતિ નરઃ સ્તોત્રં સ સદા સુખમશ્નુતે ॥ ૧૭॥

ન શૂદ્રાય પ્રદાતવ્યં શઠાય મલિનાત્મને । સમલાત્મને
દેયં દાન્તાય ભક્તાય બ્રાહ્મણાય વિશેષતઃ ॥ ૧૮॥

ઇતિ શ્રીષોડશીહૃદયસ્તોત્રં અથવા શ્રીલલિતાત્રિપુરસુન્દરીહ્રિદયસ્તોત્રં સમાપ્તમ્ ।

Encoded and proofread by Gopal Upadhyay gopal.j.upadhyay at gmail.com

---

*Shri Shodashi Hridaya*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*